पक्षे “स्त्रिया पुंवत्” इत्येकशेषेण मातृपितामहीप्रपितामहीसहितपित्रादिपरम्। एवञ्च आश्वलायनगृह्ये मनुवचने च पित्रादेरपि देवतात्वश्रवणात् मात्रादिमात्रदैवत्वं रघुनन्दनोक्तं चिन्त्यं वस्तुतः शाखिभेदेन सपत्नीकपितृश्राद्धं मात्रादिदेवताकं वा तच्छ्राद्धमिति व्यवस्था। “पित्रादित्रिकपत्नीषु भोज्या मातुः प्रति द्विजाः। स्त्रीणामेव तु तद्यस्मान्मातृश्राद्धमिहोच्यते” शङ्खवचनन्तु तासां पृथक्श्राद्धविधानार्थम्। एतच्च अन्वष्टकाश्राद्धं साग्निकमात्रेण कर्त्तव्यम्। तथा च विष्णुः। “अन्वष्टकाष्टकावदग्नौ हुत्वा मात्रे पितामह्यै प्रपितामह्यै पूर्व्ववद्ब्राह्मणान् भोजयित्वा” इति। अत्र होमत्वदेवाग्निप्राप्तेरग्निग्रहणं तन्नियमार्थम्। न चाग्नौकरणहोमे विप्रपाण्यादेर्विधानादत्रापि तथेति वाच्यम् प्रकृतिभूतश्राद्धविध्युक्ताधारान्तरस्य विकृतीभूतश्राद्धे विशेषविहिताधारेण बाधात्। न वा लौकिकाग्नौ होमः “न पैतृयज्ञियो होमो लौकिकाग्नौ विधीयते” इति मनुवचनेन निषेधात्। श्राद्धचिन्तामणावप्येवम्। श्रा॰त॰ रघुनन्दनः।

**अन्वष्टमदिश** अव्य॰ अष्टमीं दिशमनुलक्ष्यीकृत्य अव्ययी॰ अच्समा॰। पश्चिमोत्तरयोर्दिशोरष्टमाभिमुखीकृतदिग्भागे। स च वायुकोणः तस्य च पश्चिमोत्तरयोर्मावर्त्तेदक्षिणावर्त्ताभ्यामष्टमभागत्वात्तथात्वम् “अरण्ये समित्पाणिः सन्ध्यामुपास्ते नित्यं वाग्यत उत्तराभिमुखोऽन्वष्टमदिशमानक्षत्रदर्शनादिति” श्रा॰त॰ सांख्या॰गृ॰। अन्वष्टमदिशमिति उभयदिगष्टमभागमिति रघु॰। [प्रत्यहमित्यर्थे।

**अन्वह** अव्य॰ अह्नि अह्नि वीप्सार्थेऽव्ययी॰ अच् समा॰।

**अन्वाख्यान** न॰ अनु+आ+ख्या–ल्युट्। तात्पर्य्यावधारणार्थं व्याख्याने तत्प्रतिपादने च “वस्त्वन्वाख्यानं क्रियान्वाख्यानं चेति” “आत्मस्वरूपान्वाख्यानपरैषिति च वृ॰उ॰भा॰

**अन्वाचय** पु॰ प्रधानस्य पश्चादन्यः आचीयते बोध्यते यत्र अनु+आ+चि+अच्। उद्देश्यसिद्ध्यानुद्देश्यसिद्ध्यर्थोपदेशे। यथा भिक्षां गच्छ यदि गां पश्येस्ताञ्चानय, अत्र भिक्षाया एव उद्देश्यः न गवानयने, तत्सिद्ध्युत्तरं गवानयनमनुद्दिष्टमपि साध्यतया निर्द्दिष्टम्। “चान्वाचये समाहारे” इत्यमरः। “चार्थे द्वन्द्व इति” पा॰ सूत्रे “सकृत्त्वयान्वाचयेतरेतरयोगसमाहारास्चार्थाः” इति सि॰कौ॰।

**अन्वाजे** अव्य॰ अनु–आजयत्यनेन अनु+आ+जि–डे। दुर्बलस्य बलाधाने। बलस्य हि जयहेतुत्वं प्रसिद्धम्। सप्तम्यन्तप्रतिरूपकोऽयम्। “उपाजे अन्वाजे इति” पा॰ वा उपपदसमासे अन्वाजेकृत्येत्यादौ ल्यप्। पक्षे अन्वाजेकृत्वा।

**अन्वादेश** पु॰ अनु+आ+दिश–घञ्। पूर्व्वोपात्तस्य किञ्चित्कार्य्यान्तरं विधातुं पुनरुपदेशे। यथा अनेन व्याकरणमधीतं न्यायमेनं प्रपाठयेति न्यायपाठनार्थं पुनरुपदेशः। कथितकथने, अनुवादार्थे च। “इदमोऽन्वादेशेऽशनुदात्त” इति पा॰।

**अन्वाधान** न॰ वह्निस्थापनस्य पश्चात् आधानम्। आहितवह्नौ–द्वयोः तिसृणां वा समिधामाधाने। स्थण्डिलादिकरणानन्तरम् “तदभ्युक्ष्याग्निं प्रतिष्ठाप्यान्वाधाय परिसमुह्येति” श्रा॰त॰ इत्ते हि अग्न्याधानोत्तरं तदाधानमुक्तम्। “अग्न्यन्वाधानमध्वर्युर्यजमानो” वेति कात्या॰ २,१,२।

**अन्वाधि** पु॰ पश्चात् आधीयते अनु+आ+धा–कि। स्वसमीपे आहितस्य वस्तुनः स्वामिने दानाय परत्राधाने तद्विषये धने च “अर्थमार्गणकार्य्येषु अन्यस्मिन् वचनान्तरम्। दद्यास्त्वमिति यो दत्तः स इहान्वाधिरुच्यते इति” कात्या॰स॰। सन्तत आधिः। सन्ततमानसव्याधायाम्।

**अन्वाधेय** न॰ विवाहस्य पश्चात् आधेयम् दत्तम्। अनु+आ+धा–यत्। विवाहात् परम् पित्रादिभिः स्त्रीभ्यो दत्तधने स्त्रीधनभेदे “विवाहात् परतोयत्तु लब्धं भर्तृकुलात् स्त्रिया अन्वाधेयं तदुक्तं तु लब्धं बन्धुकुलात्तथेति ना॰स॰। “बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च। अप्रजायामतीतायां बान्धवास्तदवाप्नुयुरिति” या॰।

**अन्वायतन** अव्य॰ आयतनस्य मध्यम् अव्य॰। गृहमध्ये इत्यर्थे अनुगतमायतनम् अत्या॰स॰। गृहानुगते त्रि॰।

**अन्वायत्त** त्रि॰ अनु+यत–क्त। अनुगते “प्रस्तोतः! या देवता प्रस्तावमन्वायत्ता ताञ्चेदविद्वानिति” “वसवोऽन्वायत्ता” इति च छा॰उप॰।

**अन्वारब्ध** त्रि॰ अनु+आ+लभ–कर्त्तरि क्त लस्य रः। कृतस्पर्शे “विष्णोः कर्म्माणीति वाचयति यूपमन्वारब्धमिति” का॰ ६,२,१२, “अन्वारब्धं स्पृष्टवन्तमिति” वेददीपः। कर्म्मणि क्त। पश्चाद्भागे–स्पृष्टे, पश्चाल्लग्ने च। “अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु इति” श्रा॰त॰ या॰। “अन्वारब्धेन पश्चाल्लग्नेनेति” रघु॰। “द्वाभ्यां पत्नीभ्यामन्वारब्ध” इति बौ॰सू॰।

**अन्वारभ्य** त्रि॰ सह आलभ्यः लस्य रः। सहस्पृश्ये।

**अन्वारम्भ** न॰ पश्चात् आलम्भः लस्य रः। स्पर्शे अनुपूर्व्वकलभेर्हि स्पर्शार्थत्वम्। “अनड्वाहमन्वारभामहे”